चन्द्रकं, क्ली, (चन्द्र इव चन्द्रप्रभा इव कायतीति । कै+कः । वर्णसादृश्यात्तथात्वम् ।) सितमरिचम् । इति राजनिर्घण्टः ॥

चन्द्रकः, पुं, (चन्द्र इव कायति प्रकाशते इति । कै+कः ।) वर्हनेत्रम् । मयूरपुच्छेर चाँद इति भाषा । तत्पर्य्यायः । मेचकः २ । इत्यमरः । २ । ५ । ३१ ॥ (यथा, गीतगोविन्दे । २ । ३ ।
"चन्द्रकचारुमयूरशिखण्डकमण्डलवलयित-
केशम् ॥")
नखः । इति शब्दचन्द्रिका ॥ मत्स्यविशेषः । चाँदा माछ इति भाषा । अस्य गुणाः । अनभिष्यन्दित्वम् । मधुरत्वम् । बलवर्द्धनत्वञ्च । इति राजनिर्घण्टः ॥ तत्पर्य्यायः । चलत्पूर्णिमा २ चन्द्रचञ्चला ३ चन्द्रिका ४ । इति शब्दरत्नावली ॥ (मण्डलम् । यथा, माघे । ५ । ४० ।
"यां चन्द्रकैर्मदजलस्य महानदीनां
नेत्रश्रियं विकसतो विदधुर्गजेन्द्राः ॥"
"चन्द्रकैश्चन्द्राकारैर्मण्डलैर्महानदीनाम् ।" इति मल्लिनाथः ।) चन्द्रशब्दात् स्वार्थे के चन्द्रश्च ॥

चन्द्रकला, स्त्री, (चन्द्रं चन्द्राकारं सुखभागं कलयतीति । कलि+अच् टाप् च ।) डगड़वाद्यम् । चाचामत्स्यः । इति शब्दरत्नावली ॥ (चन्द्रस्य कला ।) चन्द्रस्य षोड़शभागेषु भागः । तद्‌यथा,—
"पूषा यशा सुमनसा रतिः प्राप्तिस्तथा धृतिः ।
ऋद्धिः सौम्या मरीचिश्च तथा चैवांशुमालिनी ॥
अङ्गिरा शशिनी चेति छाया सम्पूर्णमण्डला ।
तुष्टिश्चैवामृता चेति कलाः सोमस्य षोड़श ॥"
आसां प्रयोजनं तिथिभेदे स्त्रीणामङ्गविशेषे स्थितस्य कामस्य प्रणवादिसबिन्दुप्रत्येकस्वरयुक्तनमोऽन्ततत्तत्प्रत्येककलानामरूपैर्मन्त्रैश्चालनम् । इति कामशास्त्रम् ॥ * ॥ तन्त्रोक्ता कला यथा,
"अमृता मानदा पूषा पुष्टिस्तुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रीतिरङ्गदा ॥
पूर्णापूर्णामृताकामदायिन्यः शशिनः कलाः ।
आसां प्रयोजनं कलावतीदीक्षादौ पूजनम् ॥"
इति रुद्रयामलम् ॥
(चन्द्रः । यथा, कथासरित्सागरे । १ । ३६ ।
"स च दत्तमखस्तेन नाशितो मन्युना मया ।
ततो जाता हिमाद्रिस्त्वमर्ध्वेचन्द्रकला यथा ॥")

चन्द्रकान्तं, क्ली, (चन्द्रवत् कान्तं कान्तिः कमनीयता अस्य ।) श्रीखण्डचन्दनम् । कैरवम् । इति रत्नमाला ॥

चन्द्रकान्तः, पुं, (चन्द्रः कान्तः प्रियो यस्य ।) कैरवम् । (चन्द्र इव कान्तः कान्तियुक्तः । चन्द्रः कान्तः अभीष्टो अधिष्ठातृदेवोऽस्येति वा ।) मणिभेदः । इति मेदिनी । ते । १६५ ॥ अस्य पर्य्यायाः । चन्द्रमणिः २ चान्द्रः ३ चन्द्रोपलः ४ । इति हेमचन्द्रः । ४ । १३२ ॥ इन्दुकान्तः ५ चन्द्राश्मा ६ संश्रवोपलः ७ शीतांश्मा ८ चन्द्रिकाद्रावः ९ शशिकान्तः १० । (यथा, पञ्चतन्त्रे । १ । ८८ ।
"परीक्षका यत्र न सन्ति देशे
नार्घन्ति रत्नानि समुद्रजानि ।
आभीरदेशे किल चन्द्रकान्तं
त्रिभिर्वराटैर्विपणन्ति गोपाः ॥")
अस्य गुणाः । शिशिरत्वम् । स्निग्धत्वम् । असदाहग्रहालक्ष्मीनाशित्वम् । शिवप्रीतिकरत्वम् । स्वच्छत्वञ्च ॥ * ॥ तदुद्भववारिगुणाः । विमलत्वम् । लघुत्वम् । पित्तमूर्च्छापिपासादाहकासमदात्ययरोगनाशित्वञ्च । इति राजनिर्घण्टः ॥

चन्द्रकान्ता, स्त्री, (चन्द्रः कान्तः प्रियो यस्याः ।) रात्रिः । इति शब्दचन्द्रिका ॥ (चन्द्रस्य कान्ता ।) चन्द्रपत्नी च ॥

चन्द्रकालानलं, क्ली, चक्रविशेषः । यथा,—
"चन्द्रकालानलं चक्रं व्योमाकारं लिखेद्‌बुधः ।
चतुर्दिक्षु त्रिशूलानि मध्यभिन्नानि कारयेत् ॥
पूर्व्वत्रिशूलमध्यस्थं दिन ऋक्षादि लिख्यते ।
त्रिशूले च वहिर्मध्ये मध्ये वहिस्त्रिशूलके ॥
मृत्युस्त्रिशूले नामर्क्षे मध्यमं चहिरष्टके ।
क्षेमलाभजयप्रश्नाः नामर्क्षे चन्द्रगर्भगे ॥
वर्जनीयं प्रयत्नेन प्रथमाष्टत्रिपञ्चकम् ॥"
इति समयामृतम् ॥

चन्द्रकी, पुं, स्त्री, (चन्द्रको विद्यतेऽस्येति अच् । चन्द्रक+ङीष् ।) मयूरः । इति त्रिकाण्डशेषः ॥

चन्द्रकुण्डः, पुं, (चन्द्रस्य कुण्डः चन्द्ररश्मिनिर्म्मितः कुण्डो वा । चन्द्राधिष्ठातृकः कुण्ड इत्यर्थः ।) कामरूपस्थसरोवरविशेषः । (यथा, कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्याये ।
"चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड ! महोदधे ! ॥")

चन्द्रकूटः, पुं, (चन्द्राख्यः कूटः पर्व्वतः । यद्वा, चन्द्रः कूटे शृङ्गे यस्य । प्रतिदिने चन्द्रप्रदक्षिणकरणादेवास्य तथात्वम् ।) कामरूपस्थपर्व्वतभेदः । यथा,—
"पूर्व्वे वायुगिरेः शैलश्चन्द्रकूट इति स्मृतः ।
त्रिकोणस्ताम्रसङ्काशस्तदूर्द्ध्वे चन्द्रमण्डलम् ॥
द्वितीयवर्गस्याद्यन्तु विन्दिन्दुभ्यामलङ्कृतम् ।
चन्द्रबीजमिति प्रोक्तं तेन चन्द्रं प्रपूजयेत् ॥
अद्यापि प्रतिदर्शे तु पर्व्वतं तं निशापतिः ।
प्रदक्षिणीकरोत्येव दशभी रश्मिभिर्युतः ॥
तस्यैव पूर्व्वभागे तु सोमकुण्डाख्यं सरः ।
तत्र स्नात्वा च पीत्वा च नरः कैवल्यमश्नुते ॥
स्वर्गादवसृतश्चन्द्रः कामाख्यासेवने यदा ।
तदा तद्रश्मिसंघातनिःसृतास्तोयराशयः ॥
तैस्तोयैर्व्वासवः कुण्डमकरोदिन्द्रचन्द्रयोः ।
मध्ये पुण्यतमस्थाने स्वयं ब्रह्मशिलोपरि ॥
चन्द्ररश्मिसमुद्भूत ! चन्द्रकुण्ड ! महोदधे ! ।
सुधास्रवण ! साह्लाद ! त्वं चन्द्र ! कलुषं हर ॥
इत्यनेन तु मन्त्रेण सुस्नाय चन्द्रपाथसि ।
चन्द्रकूटं समारुह्य पूजयेद्‌यस्तु तं नरः ॥
अविच्छिन्ना सन्ततिस्तु सुकान्ता तस्य जायते ।
परत्र चन्द्रभवनं भित्त्वा याति परं पदम् ॥
तीरे तु चन्द्रकूटस्य नन्दनो नाम वै गिरिः ।
तस्मिन् वसति शक्रस्तु कामाख्यासेवने रतः ॥
न्यञ्चभावं समासाद्य सर्व्वदेवेश्वरो हरिः ।
सेवितुं त्रिदशेशानीं सततं वर्त्तते नरः ॥
चन्द्रकूटस्य तु गिरेर्नन्दनस्य तथा गिरेः ॥
प्रतिदर्शं तथा चन्द्रः प्रदक्षिणयति त्रिधा ॥
चन्द्रकुण्डजले स्नात्वा समारुह्याथ नन्दनम् ।
आराध्य शक्रं लोकेशं महाफलमवाप्नुयात् ॥"
इति कालिकापुराणे कामाख्यारूपनिर्णये ८१ अध्यायः ॥

चन्द्रगुप्तः, पुं, (चन्द्रेण गुप्तः रक्षितः । चन्द्रवदाह्लादजनकरूपगुणवत्त्वात्तथात्वं वा ।) राजविशेषः । (यथा, भागवते । १२ । १।११—१२ ।
"नवनन्दान् द्विजः कश्चित् प्रपन्नानुद्धरिष्यति ।
तेषामभावे जगतीं मौर्य्या भोक्ष्यन्ति वै कलौ ।
स एव चन्द्रगुप्तं वै द्विजो राज्येऽभिषेक्ष्यति ॥")
चित्रगुप्तः । इति केचित् ॥

चन्द्रगोलस्थाः, पुं, (चन्द्र एव गोलः चन्द्रगोलकस्थानं चन्द्रलोक इत्यर्थः । तत्र तिष्ठन्ति ये ।) दिव्यपितरः । इति त्रिकाण्डशेषः ॥ बहुवचनान्तोऽयं शब्दः ॥

चन्द्रगोलिका, स्त्री, (चन्द्रगोलः साधनत्वेनास्त्यस्याः । इति ठन् टाप् च ।) ज्योत्स्ना । इति हेमचन्द्रः । २ । २० ॥

चन्द्रचञ्चला, स्त्री, (चन्द्र इव चलज्जलस्थचन्द्रवत् चञ्चला ।) चन्द्रकमत्स्यः । इति शब्दरत्नावली जटाधरश्च ॥

चन्द्रदाराः, पुं, (चन्द्रस्य दाराः पत्न्यः ।) अश्विन्यादिनक्षत्राणि । इति हलायुधः ॥ बहुवचनान्तोऽयम् ॥

चन्द्रपुष्पा, स्त्री, (चन्द्र इव पुष्पमस्याः ।) श्वेतकण्टकारी । इति राजनिर्घण्टः ॥

चन्द्रप्रभः, पुं, (चन्द्र इव प्रभा यस्य ।) कृत्तार्हद्विशेषः । इति हेमचन्द्रः । १ । २७ ॥ (चन्द्रप्रभाविशिष्टे, त्रि । यथा, महाभारते । ६।२०।८ ।
"चन्द्रप्रभं श्वेतमस्यातपत्रं
सौवर्णस्रग्भ्राजते चोत्तमाङ्गे ॥")

चन्द्रप्रभा, स्त्री, (चन्द्रवत् प्रभा स्निग्धादिगुणवत्तास्याः ।) वाकुची । इति राजनिर्घण्टः ॥ औषधविशेषः यथा, सुखबोधे ।
"कृमिरिपुदहनव्योषत्रिफलामरदारुचव्यभूनिम्बम् ।
मागधिमूलं मुस्तं सशठीवचामाक्षिकञ्चैव ॥
लवणक्षारनिशायुगकुस्तुम्बुरुगजकणातिविषाः ।
कर्षांशकान्येव समानि कुर्य्यात्
पलाष्टकं चाश्मजतोर्विदध्यात् ।
निष्पत्रशुद्धस्य पुरस्य धीमान्
पलद्वयं लौहरजस्तथैव ॥
सिताचतुष्कं पलमत्र वंशा
निकुम्भकुम्भत्रिसुगन्धियुक्तम् ।
चन्द्रप्रभेयं गुड़िका प्रयोज्या
चार्शांसि निर्णाशयते शड़ेव ॥
भगन्दरं पाण्डुरकामलाश्च
तिर्नष्टवह्निः कुरुते च दीप्तिम् ।